**Gyanshauryam, International Scientific Refereed Research Journal**
Available online at : **www.gisrrj.com**
OPEN ACCESS
ISSN : 2582-0095
doi : https://doi.org/10.32628/GISRRJ

# भीत्रार्थानां भयहेतुरिति सूत्रार्थविचारः

**राजेन्द्र कुमार पण्डा**
शोधछात्रः, रा.सं.विश्वविद्यालयः, तिरुपतिः

**Article Info**

**Article History**
Accepted : 20 Sep 2024
Published : 05 Oct 2024

**Publication Issue :**
Volume 7, Issue 5
September-October-2024

**Page Number :** 95-97

**सारांशः** - भयार्थानां त्राणार्थानाञ्च धातूनां योगे भयं प्रति हेतुभूतस्यापादानसंज्ञा अनेन सूत्रेण विधीयते। इदं सूत्रं षष्ठ्याः अपवाद इति कैयटः[1]। हेतुतृतीयायाः अप्ययमपवादः। मनोरमायां प्रश्नः उद्भावितः अनेन सूत्रेण भयहेतोः अपादानत्वात् पञ्चमी विहिता चेत् कथं “कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे[2]” इति वाल्मीकीये पद्यांशे भयहेतुभूतस्य किम्-शब्दस्य कथं षष्ठीप्रसक्तिः, न अपादानपञ्चमी ? मनोरमायां[3] समाधानस्य सारांशो वर्ण्यते। कस्येति पदस्य संबन्धो न भीधातूपस्थाप्यक्रियया सह वर्तते। किन्तु कस्य संयुगे इति युद्धार्थकेन सप्तम्यन्तेन संयुगे इति पदेन सह वर्तते। अत एव किम्पदार्थे भयहेतुत्वस्याभावात् न तस्यापादानत्वं नापि तन्मूलिका पञ्चमी प्रसज्यते। ननु संयुगस्य भयहेतुत्वात् अपादानत्वं स्यात् इति चेन्न। भयहेतुत्वात् प्राप्ता अपादानसंज्ञा, अधिकरणसंज्ञया परया बाध्यते। अतः ततः सप्तम्येव न पञ्चम्यापत्तिः। यदि तु अधिकरणत्वस्याविवक्षा, तर्हि अपादानत्वे इष्टापत्तिरेव। तदा “कस्य संयुगात् देवाश्च बिभ्यति” इति वाक्यप्रयोगः कर्तव्यः। शब्दरत्नकाराणां मते तु किम्पदार्थस्य भयहेतुत्वेऽपि शेषत्वविवक्षायां षष्ठी साध्व्येव। अतः **भीत्रार्थानां भयहेतुरिति सूत्रार्थविचारः** इति शीर्षकमाश्रित्य मया शोधलेखः विलिख्यते।

**कूटशब्दाः** – हेतुतृतीयापवादत्वम्, शाब्दबोधः, भयहेतुग्रहणं, अपादाने, पञ्चमी इत्यादयः।**कूटशब्दाः** - गवेषणा, संशोधनम्, मार्गणा, मार्गणम्, परिशोधनम्, शोधः, समालोचनम्, परिशीलनम्, अध्ययनम्, समीक्षणम्, अन्वेषणम्, निरीक्षणम् ।

**भीत्रार्थानां भयहेतुः**[4] हेतुतृतीयायां प्राप्तायाम् इदं सूत्रम् ।

सूत्रार्थः–"भयार्थानां त्राणार्थानां च प्रयोगे भयहेतुरपादानं स्यात्" इति भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां सूत्रार्थः कृतः। शेखरे भयं भीः, त्राणं त्राः इति विग्रहं प्रदर्श्य, तदाह भयार्थानामिति नागेशेन लिखितम्। अस्य अयं भावः "भीत्रार्थानाम्" इति सूत्रे धातोर्निर्देश इति स्वीकारे अर्थशब्देन सह व्यधिकरणबहुव्रीहिः समासः आश्रयणीयः स्यात्। अत एव भयं भीः, त्राणं त्राः इति क्विबन्तः विग्रहः नागेशेन प्रदर्शितः। तथा च अर्थशब्देन सह समानाधिकरणबहुव्रीहिः सिद्ध्यति तदाह दीक्षितः– भयार्थानां त्राणार्थानामिति।

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

**सुत्रे समासप्रदर्शनम् -** भीः त्राः अर्थाः येषां ते भीत्रार्थाः तेषां भीत्रार्थानामिति। भयस्य हेतुः भयहेतुरिति। तथा च भयार्थानां त्राणार्थानां च प्रयोगे भयस्य हेतोरपादानं स्यात् इति ।

**हेतुतृतीयापवादत्वम्-** अयं भावः 'चोराद् बिभेति' त्रायते वा" इत्यत्र भयस्य हेतुः चोरः अस्ति। अतः चोरशब्दात् ' हेतौ' इत्यनेन तृतीया प्राप्ता, ताम्प्रबाध्य" भीत्रार्थानामिति सूत्रेण चोर इत्यस्य अपादानसंज्ञा क्रियते।' अपादाने पञ्चमी[5]' इत्यनेन पञ्चमी च सिद्धयति। अथ च "हेतौ"[6] इति सामान्यम् शास्त्रम्, अनेन हेतौ- हेत्वर्थे सर्वत्र सामान्यरूपेण तृतीया क्रियते, "भीत्रार्थानां भयहेतुः "भयार्थकत्राणार्थानां प्रयोगे भयस्य हेतोरेव अपादानं क्रियते, चेत् अस्यापि उद्देश्यस्थले भयहेतौ अपि 'हेतौ' इत्यनेन तृतीया स्यात् तदा इदं" भीत्रा" इति सूत्रम् उद्देश्यरहितम्, अवकाशरहितं वा स्यात्। अतः "निरवकाशो हि विधिरपवादाय कल्प्यते"। अर्थात् "सामान्योद्देश्यताकशास्त्रस्य" हेती इति सामान्यहेतुत्वा-वच्छित्रोद्देश्यताकशास्त्रस्य विशेषोद्देश्यताकशास्त्रेण" भीत्रार्थानां भयहेतुः" इति विशेषभयत्वविशिष्ट-हेतुत्वाच्छिन्नोद्देश्यताकशास्त्रेण बाधः इति नियमः। अतोऽस्य हेतुतृतीयाऽपवादत्वं सुस्पष्टम्। अथ च हेतुतृतीयां बाधित्वा अनेन अपादानं भवति, तत्र अपादाने पञ्चमी भवति, अत एव अस्याः पञ्चम्याः हेतुः अर्थः भवति। तथैव बोधोऽपि भवति।पश्यतु भवान् वाक्यार्थं शव्दबोधं वा।

**शाब्दबोधः -** चोराद् बिभेति-चोरेण हेतुना भयं करोति (देवदत्त) इति वाक्यार्थः। अर्थात् "देवदत्तैककर्तृकं वर्तमानकालिकं चोरहेतुकं भयम्" अनेन प्रकारेणापि वक्तुं शक्यते व्याकरणनये-"देवदत्ताभिन्नैककर्तृकवर्तमानकालिकचोर हेतुको भयानुकूलो व्यापारः" इति व्यापारमुख्यविशेष्यकः

"चोरात्त्रायते" इति "देवदत्तः आत्मानम् अन्यं कृष्णदत्तं वा चोरात् त्रायते" अत्रापि चोरहेतुकं भयमस्ति। चोरेण मम (आत्मनः) हिंसा, बन्धनं, वित्तहरणं वा न भवेत् इति चोरहेतुकं भयं तस्मात् त्रायते- रक्षणोपायः क्रियते। भयहेतुः चोरः तस्यापादानसंज्ञायामपादाने पञ्चमीति चोरशब्दात् पञ्चमी। तथा च शाब्दबोधः देवदत्तैककर्तृक वर्तमानकालिकचोरहेतुकभयाद् आत्मरक्षानुकूलो व्यापारः इति।

**"कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे" इत्यत्रापादानत्ववारणम् ।**

अत्र "भीत्रार्थानां भयहेतुरि "त्यनेन बिभ्यति प्रयोगे कस्य इत्यत्र अथवा कस्य इत्यन्विते 'संयुगे' इत्यत्र वाऽपादानं कथं न? इति शङ्का उदेति। कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे इति तु कस्येत्यस्य संयुगेनान्वयात् नास्ति भयहेतुत्वमिति षष्ठीप्रयोगः संगच्छत एव। न चैवं संयुगस्यापादानत्वापत्तिरिति वाच्यम्, परया अधिकरणसंज्ञया अपादानसंज्ञाया बाधात्। अधिकरणत्वाविवक्षायां तु इष्टापत्तेः।

**भयहेतुग्रहणं प्रयोजनम् -** सिद्धान्तकौमुद्यां भयहेतुग्रहणं किम् अरण्ये बिभेति इति प्रत्युदाहरणं दत्तम्। अयं भावः- "भीत्रार्थानां भयहेतुः" इत्यत्र भयहेतुग्रहणं विनाऽपि "चोराद् बिभेति, ज्ञायते वा" इत्यत्र भयार्थक, त्राणार्थक (बिभेति, त्रायते)प्रयोगे अपादानं स्यात् ततः पञ्चमी स्वत एव सिद्धा। अतः सूत्रे भयहेतुग्रहणं किमर्थं स्यात्? इति प्रश्ने समायाते तत्फलं प्रत्युदाहरणं वा प्रस्तौति सिद्धान्तकौमुद्यां दीक्षितः 'अरण्ये बिभेति' इति। अयं भावः यदि सूत्रे "भयहेतुः" इति न स्यात् तदा "अरण्ये बिभेति" इत्यत्रापि भयार्थकबिभेति इति प्रयोगे अरण्यशब्दस्य अपादानसंज्ञा स्यात् एवम् अपादाने पञ्चमी स्यात्। सप्तमी न सिद्ध्येत इति अनिष्टप्रयोगापत्तिः, तस्मात् भयहेतुग्रहणम् अस्ति सप्रयोजनम् इति भावः।

परञ्च तत्त्वबोधिन्यां, शब्दकौस्तुभे च "अरण्ये बिभेति" इत्यत्र प्राप्तायाः "भीत्रा" इति अपादानसंज्ञायाः परत्वात् "अधिकरणसंज्ञया बाधात् अधिकरणसंज्ञा एव स्यात् ततः सप्तमी स्यात् इति 'अरण्ये बिभेति' इति नेदं फलं, प्रत्युदाहरणं प्रयोजनं वा 'भयहेतुः' इति ग्रहणस्य। अतः तत्त्वबोधिन्यामुक्तंभयहेतुग्रहणं चिन्त्यप्रयोजनमिति।

अथ च श्रीमन्नागेशः पुनः प्रयोजनं स्थापयति अरण्ये इति।"भयाद्यर्थानां योगे कारकमपादानम् इत्यर्थेऽविशेषात् सर्वसञ्ज्ञापवादः स्यात् इति भावः।"

'भयहेतुः' इति पदग्रहणाभावे "भीत्रार्थानाम्" इति योगस्वरूपं स्यात्। तदा कारके इत्यधिकारात् अपादानम् इत्यनुवृत्तौ च अयमेव अर्थः स्यात्,यत्"भयार्थानां त्राणार्थानां योगे कारकम् अपादानसंज्ञं स्यात्" इति। एवमर्थे सति अविशेषात् अयं

सर्वसञ्ज्ञानाम् अपवाद: स्यात् इति, अर्थात् या अपि संज्ञा: कर्तृकरणाधिकरणादय: अन्यत्र चरितार्था: अस्य विषये प्राप्ता: तासां सर्वासां संज्ञानाम् अयम् अपवाद: स्यात् इत्यपादानं दुर्वारं स्यात्। अत: 'अरण्ये बिभेति' इत्यत्र अपादानं न स्यात् इति अपादानवारणार्थं "भयहेतु:" इति ग्रहणम् आवश्यकम् इति भाव:।

यदि 'चोराद् बिभेति' इत्यस्य 'चोराद् भीत्या निवर्तते' इति अर्थ: क्रियते तथा च चोरात् त्रायते इत्यस्य चोरात् आत्मानं रक्षितुं निवर्तते इति क्रियेत तदा बुद्धिकल्पितविशेषजन्यमवधिं स्वीकृत्य 'ध्रुवमपायेऽपादानम्' इत्यनेनैव अपादानत्वं सिद्ध्येत्, सूत्रं नावश्यकमिति भाष्याशय: । इतिभाव: ।

## संदर्भग्रन्थसूची


1.कारकशेषत्वात् षष्ठ्यां प्राप्तायामिदं वचनमिति।

2.वा.रा. बालकाण्डम् 1.4

3.प्रौ.म. भीत्रार्थानां भयहेतु:–"कस्य संयुगे इति। न चैवं संयुगस्यैवापादासंज्ञापत्ति:, परयाऽधिकणसंज्ञया बाधात्। अधिकरणत्वाविवक्षायां त्विष्टापत्ति:।"

4.अष्टाध्यायी.1.4.25

5.अष्टाध्यायी.2.3.28

6.अष्टाध्यायी 2.3.23